# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ५** | **गुणाः - ७०** |
| विषयः - फलितज्यौतिषम् | (C.C.- 2.3.5. New ) | |
| दिनाङ्कः - ०८/१२/२०१८ | भारतीय-कुण्डली-विज्ञानम् | समयः ०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत । (१०)**

(१) पंक्तिः स्वेष्टाद् भवेदग्रे पंक्त्यामिष्टं विशोधयेत् ।
तच्चालनमृणं ज्ञेयं व्यत्यये व्यत्ययं विदुः ॥

(२) गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता ।
लब्धमंशादिना शोध्यं योज्यं स्पष्टो भवेद् ग्रहः ॥

(३) गतर्क्षनाडीखरसेषुशुद्धा सूर्योदयाष्टिघटीषुयुक्ता ।
भयातसंज्ञाभवतीहतस्य निजर्क्षनाड्यासहितो भभोगः ॥

**प्रश्नः २ कस्याप्येकस्योत्तरं लिखत । (१०)**

(१) भद्राविचारः

(२) चरखण्डानयनम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु द्वयोः ससन्दर्भ व्याख्यां कुरुत । (१०)**

(१) गृहं होरा च द्रेष्काणो नवांशो द्वादशांशकः ।
त्रिंशांशश्चेति षड्वर्गास्ते सौम्यग्रहजाः शुभाः ॥

(२) कुजयमजीवज्ञसिताः पंचेन्द्रियवसुमुनीन्द्रियांशानाम् ।
अयुजि युजि तु भे विपर्ययस्थाः ॥

(३) अथोच्यते सप्तकवर्गचक्रं खगामिनां तद्बलसाधनार्थम् ।
बलं विना खेटफलं न वक्तुं भावादिजातं च नरः क्षमः स्यात् ॥

**प्रश्नः ४ कस्याप्येकस्योत्तरं सविस्तरेण लिखत । (१०)**

(१) चलितचक्रविचारः

(२) अभिजितदशासाधनम् ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) द्विघ्नेष्टनाड्यः पंचाप्ता भं शेषञ्च पलीकृतम् ।
दशाप्तमंशास्ते युक्ता रवौ होरोदयो भवेत् ॥

(२) सूर्यराश्यंशकोष्ठाङ्कं स्वेष्टकालेन संयुतम् ।
यत्र तत्तिर्यगूर्ध्वाङ्कं लग्नं राश्यादिकं मतम् ॥

(३) जन्मलग्नपतिरब्दलग्नपो मुंथहाधिप इतस्त्रिराशिपः ।
सूर्यराशिपतिरह्निचन्द्रमांधीश्वरोनिशिविमृश्यपञ्चकम् ॥

**प्रश्नः ६ कस्याप्येकस्योत्तरं सविस्तरेण लिखत ।** **( १० )**

(१) गुलिकेष्टसाधनम् । (२) मुन्थाविचारः ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु दशप्रश्नानामेकद्विवाक्येन उत्तराणि यच्छत ।** **( १० )**

(१) नक्षत्राणि कति सन्ति ?

(२) अयनः कति ?

(३) लीरमासः कस्य सनस्य नाम अस्ति ?

(४) मिथुनराश्याः, आङ्ग्लभाषायां किं नाम ?

(५) ''वीनसः'' अर्थात् कः ग्रहः ?

(६) पंक्ति अर्थात् किम् ?

(७) संवत्सराणि कति सन्ति ?

(८) तुलाराशेः नीचग्रहस्य नाम किम् ?

(९) अष्टोत्तरी-दशायां कति वर्षाणि भवन्ति ?

(१०) ग्रहाणां बालादि अवस्था कति सन्ति ?

(११) ''इशराफः'' अर्थात् किम् ?

(१२) पृच्छकः अर्थात् किम् ?

(१३) द्रेष्काणे कति भागाः सन्ति ?

(१४) पक्षाः कति सन्ति ?

(१५) पारिजातादिवर्गे कति वर्गाः सन्ति ?

--००--